## 17. सप्तदशः पाठः
## कोणार्कः

क्तवतु- प्रत्ययः

पूजावकाशे अहं स्वमित्रैः सह कोणार्कमन्दिरं द्रष्टुम् अर्कक्षेत्रं गतवान् आसम् । वयं सर्वे तत्र प्रथमवारं गतवन्तः आस्म । अस्माभिः सह अस्माकं शिक्षिका तस्याः भगिनी च गतवत्यौ आस्ताम् । अस्माकं ज्ञानाय शिक्षिका कोणार्कविषये अस्मान् बोधितवती । सा अस्माकं पुरतः मन्दिरस्य विवरणं प्रस्तुतवती ।

कोणार्कमन्दिरम् उत्कलप्रदेशस्य वङ्गोपसागरसमीपे अस्ति । तत्र सूर्यदेवस्य पूजा भवति । अतः पौराणिकाः तत् क्षेत्रम् अर्कक्षेत्ररूपेण वर्णितवन्तः । ऐतिहासिकाः कोणार्कस्य परिगणनं विश्वस्य सप्ताश्चर्येषु कृतवन्तः । वैदेशिकाः पर्यटकाः तस्य "ब्लैकपगोडा" इति अपरम् अपि नाम कृतवन्तः । अनन्तरं तत् नाम सर्वे स्वीकृतवन्तः ।

कोणार्कः न केवलम् उत्कलस्य, अपि तु समग्रस्य भारतवर्षस्य भूषणम् अस्ति । त्रयोदशशताब्ध्याम् उत्कलीयाः कलाकाराः एतत् मन्दिरं निर्मितवन्तः इति ऐतिहासिकाः प्रमाणितवन्तः । कोणार्कमन्दिरस्य निर्माणविषये धर्मपदस्य किंवदन्ती प्रसिद्धा अस्ति इति अस्माकं शिक्षिका उक्तवती ।

धर्मपदः तदा द्वादशवर्षीयः बालकः आसीत् । तावत् सः स्वजनकं विशुमहाराणाम् एकवारम् अपि न दृष्टवान् आसीत् । सः तु तस्य जन्मतः प्राक् प्रवासं गतवान् आसीत् । द्वादशसहस्रश्रमिकैः सह नृपः तं कोणार्कमन्दिरस्य निर्माणकार्ये नियोजितवान् आसीत् । विद्यालये धर्मपदस्य मित्राणि "तस्य जनकः नास्ति" इति आक्षेपं कृतवन्तः । दुःखितः सः जनन्यै सर्वं निवेदितवान् । "द्वादशवर्षेभ्यः तस्य जनकः प्रवासे अस्ति" इति जननी उक्तवती । "जनकं द्रष्टुं गमिष्यामि" इति जननीम् उक्तवान् धर्मपदः । "जनकस्य परिचयं न जानासि" इति उक्त्वा जननी तं निवारितवती । परन्तु धर्मपदः तत्र गन्तुं प्रतिज्ञातवान् । अन्ततो गत्वा जननी अनुमतिं दत्तवती । "प्राङ्गणस्य वदरिकावृक्षस्य फलं गृहीत्वा गच्छतु" इथि जननी उपदिष्टवती । तेन जनकस्य परिचयो भविष्यति इति उक्तवती । धर्मपदः प्रातः यात्रां प्रारब्धवान् । मार्गे सायंकालः अभवत् । सः कस्यचित् वृक्षस्य अधः रात्रियापनं कृतवान् । तत्र सः खगयोः वार्तां श्रुतवान् । तौ परस्परं भाषितवन्तौ आस्ताम् । 'श्वः द्वादशसहस्रश्रमिकाणां शिरश्छेदः भविष्यति' इति एकः उक्तवान् । 'किमर्थम्' इति अपरः पृष्टवान् । "कोणार्कमन्दिरस्य शिखरनिर्माणे श्रमिकाः असफलाः सन्ति । अतः नृपः तेषां प्राणदण्डम् आदिष्टवान् अस्ति" इति प्रथमः उत्तरितवान् । "परन्तु यदि कश्चित् सूर्योदयात् प्राक् शिखरनिर्माणं करिष्यति तर्हि तेषां प्राणरक्षा भविष्यति" इति सूचितवान् ।

खगयोः वार्तां श्रुत्वा धर्मपदः मन्दिरं प्रति धावितवान् । सः मातुः मुखात् एतत् कौशलं श्रुतवान् आसीत् । मन्दिरम् आरुह्य सः शिखरं निर्मितवान् । एतद् रहस्यं नृपः न जानातु इति कारणात् सः मन्दिरशिखरात् समुद्रजलं प्रति

कूर्दितवान् । स्वप्राणान् च त्यक्तवान् । एवं सः स्वजनकस्य अन्येषां चश्रमिकाणां प्राणरक्षां कृतवान् ।

कोणार्कस्य गात्रेषु उत्कीर्णाः उत्कृष्टाः भास्करकलाः तदानीं पर्यटकान् आकृष्टवत्यः, इदानीम् अपि आकर्षन्ति ।